## २०२१–२२

## शास्त्रीपरीक्षा

### खण्डः- तृतीयः, अधिसत्रं- द्वितीयम्

### विषयः-संस्कृतम् ('ख' वर्गः), पत्रं- सप्तमम्

---

**समयः ३½ होराः** **सम्पूर्णाङ्काः- ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. कयोश्चिद् द्वयोः कारिकयोः व्याख्या कार्या-** **२x७½=१५**

**क.** नास्म्यहं न भविष्यामि न मेऽस्ति न भविष्यति।
इति बालस्य संत्रासः पण्डितस्य भयक्षयः।।

**ख.** मनोरथान् हन्त्यभिध्या व्यापादो भयदः स्मृतः।
मिथ्यादृष्टिः कुदृष्टित्वं मद्यपानं मतिभ्रमः।।

**ग.** कायवाङ्मनसं कर्म सर्वं सम्यक् परीक्ष्यः यः।
परात्महितमाज्ञाय सदाकुर्यात्स पण्डितः।।

**घ.** हिंसया जायतेऽल्पायुःबह्वाबाधो विहिंसया।
चौर्येण भोगव्यसनी सशत्रुः पारदारिकः।।

२. रत्नावलीकारस्य आचार्यनागार्जुनस्य जीवनवृत्तान्तंप्रतिपादयत। १०

**अथवा**

रत्नावल्याः पठितांशमवलम्ब्य पञ्चस्कन्धान् वर्णयत।

**३. अधोलिखितानां प्रश्नानामुत्तरमेकैकवाक्येन देयम् -** **१०**

**क.** हिंसया किं जायते?

**ख.** पैशुन्यात् किं भवति?

**ग.** अप्रदानेन किं भवति?

**घ.** मिथ्याजीवेन का?

**ङ.** कस्मात् दुर्वणता जायते?

**च.** अभ्युदयः कः।

**छ.** निःश्रेयसः कः?

**ज.** कस्मात् धर्मं भजते?

**झ.** पण्डितः कः?

**ञ.** भोगव्यसनी केन?

**४. सन्दर्भोल्लेखपुरस्सरं कयोश्चिद्द्वयोः व्याख्या कार्या-** **२०**

**क.** अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता।

**ख.** एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनम् उपासनानां तु चित्तैकाग्र्यम्। तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन इत्यादि श्रुतेः। तपसा कल्मषं हन्ति इत्यादिस्मृतेश्च। नित्यनैमित्तिकप्रायश्चित्तोपासनानां

त्ववान्तरफलं पितृलोकसत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेः।

**ग.** प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे।

गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे॥

५. वेदान्तसारदृशा साधनचतुष्टयं प्रतिपाद्यताम्। **१०**

**अथवा**

वेदान्तसारमवलम्ब्यअज्ञानस्य स्वरूपं निरूप्यताम्।

**६. अधोलिखितानामुत्तरमेकैकेन वाक्येन देयम् -** **१०**

**क.** वेदान्तशास्त्रस्य विषयः कः?

**ख.** समाधिः कतिविधः भवति?

**ग.** केन अपवादन्यायेन गुरुः उपदिशति?

**घ.** कः जगतः कारणमस्ति?

**ङ.** सूक्ष्मशरीरस्य कति अवयवाः?

**च.** कानि ज्ञानेन्द्रियाणि?

**छ.** निश्चयात्मिकान्तः करणवृत्तिः का?

**ज.** मनो नाम किमस्ति?

**झ.** कानि कर्मेन्द्रियाणि सन्ति?

******************************